# "A floral offering at the ADHISHTANAM of Pujya Swamiji in Rishikesh"

ॐ

## श्रीदयानन्ददशकम्

परमाद्वैततत्त्वज्ञं ज्ञानानन्दप्रकाशनम् ।
गीतोपनिषदासारं दयानन्दं नमाम्यहम् ॥ १

लघुप्रवाहतत्त्वार्थं श्रोत्रानन्दश्रुतिस्रवम् ।
घनस्वनप्रसत्तिं च वन्देहं तं दयार्णवम् ॥ २

स्पष्टवागर्थसद्बोधं वागर्थयुक्तजीवनम् ।
सत्त्वगुण्यप्रकाशं तं भजेहं भक्तिपूरणम् ॥ ३

श्लोकसङ्गीतसामोदं श्लोकितापारसद्गुणम् ।
शोकापोहनसुज्ञानं वन्देहं गीतकारकम् ॥ ४

योगसारोपदेशं च ज्ञानयोगोपदेशकम् ।
रागद्वेषविवर्जं तं वन्देहं तत्त्वबोधकम्। ५

अद्वैततत्त्ववाक्यार्थं अद्वितीयसुबोधनम् ।
अद्वितीयैकसानन्दं तं वन्दे सत्यदर्शनम् ॥ ६

ब्रह्मज्ञानप्रकाशं च ब्रह्मैक्यतत्त्वबोधनम् ।
ब्रह्मानन्दप्रसादं तं वन्देहं सत्त्वभाषिणम्॥ ७

तर्कशास्त्रप्रवीणं च तत्त्वव्याख्यातृतल्लजम् ।
दयानन्दगुरुं वन्दे दयानन्दसुरूपकम् ॥ ८

दशमस्कन्दनाथोपदेशप्रमाणजीवनम् ।
दशश्लोकनुतिप्रीतं तं वन्दे श्लोकसन्निधिम् ॥ ९

गङ्गाक्षेत्रसमाधिं तं गङ्गादर्शनविग्रहम् ।
गङ्गालयमहापुण्यं दयानन्दं नमाम्यहम् ॥ १०

त्यागब्रह्मगुरुस्वामिशिष्यापुष्पाकृतार्पणम् ।
दयानन्दगुरुस्तोत्रं परमार्थं शुभप्रदम् ॥

ॐ

शुभमस्तु

**-Smt Pushpa Srivatsan**